**व्रीहिकाञ्चन** पु० व्रीहिषु काञ्चनं तद्रूपमस्त्यस्य अच्। मसूरे त्रिका०।

**व्रीहिपर्णी** स्त्री व्रीहीणामिव पर्णान्यस्याः ङीष्। (शालपानि) क्षुपभेदे राजनि०।

**व्रीहिभेद** पु० ६त०। १धान्यभेदे (चिना) अमरः। २धान्यविशेषे च।

**व्रीहिमय** पु० व्रीहेर्विकारः पुरोडाशः मयट्। व्रीहिविकारे पुरोडाशे। अन्यत्र त्रिल्वा० अण्।

**व्रीहिराजिका** पु० व्रीहिषु राजिकाकारे अस्त्यस्याः अच्। कङ्गुधान्ये (काङ्नी) मेदि०।

**व्रीहिश्रेष्ठ** पु० व्रीहिषु श्रेष्ठः। शालिधान्ये राजनि०।

**व्रीह्यगार** न० ६त०। धान्यस्थापनस्थाने कुशूले त्रिका०।

**व्रीह्यादि** पु० विकाराद्यर्थे इनिठन्प्रत्ययनिमित्ते पा०ग०सू० उक्ते शब्दगणे स च "व्रीहि माया शाला शिखा माला मेखला केका अष्टका पताका चर्मन् कर्मन् वर्मन् दंष्ट्रा संज्ञा वडवा कुमारी नौ वीणा बलाका यवखद नौकुमारी (शीर्षान्नञः)" "नौकुमार्य्यौरिकार्थौ गणे द्विधा पाठः" सि०कौ०। "अत इनिठनौ" "व्रीह्यादिभ्यश्च" पा०व्रीही व्रीहिकः। "न च सर्वेभ्यो व्रीह्यादिभ्य इनिठनाविष्येते किं तर्हि शिखामालासंज्ञादिभ्य इनिः यवखदादिभ्यः ठन्। अन्येभ्य उभयम्" सि०कौ०।

**व्रुड** संवरणे सक० संघाते मज्जने च अक० तु० कुटा० पर० सेट्। व्रुडति अव्रुडीत्।

**व्रूस** वधे वा चु० उभ० पक्षे भ्वा० पर० सक० सेट्। व्रूसयति ते व्रूसति। [चेलादौ।

**व्रैहेय** त्रि० व्रीहीणां भवनं क्षेत्रम् ढक्। व्रीहिभवनयोग्ये

**व्ली** गतौ वृतौ च क्र्यादि० पा० प०सक० अनिट्। (वि)व्लीनाति अव्लैषीत्।

## परिशिष्टम्।

**उज्य** पु० सामवेदप्रसिद्धे यज्ञभेदे सि०कौ०।

**विजया** स्त्री शच्यादिषु मातृषु मातृभेदे

**विजयाभिनन्दन** पु० कलियुगीयशककर्त्तृ नृपभेदे शकशब्दे दृश्यम्।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्य संकलिते वाचस्पत्याभिधाने वकारादिशब्दार्थसङ्कलनम्।

# श

**शकारः** ऊष्मवर्णभेदः। अस्योच्चारणस्थानं तालु। तस्योच्चारणे आभ्यन्तरप्रयत्नः विवृतम्। बाह्यप्रयत्ना विवारश्वासाघोषा महाप्राणश्च। अस्य ध्येयस्वरूपम् "शकारं परमेशानि! शृणु वर्णं शुचिस्मिते!। रक्तवर्णप्रभाकारं स्वयं परमकुण्डली। चतुर्वर्गप्रदं देवि! शकारं ब्रह्मविग्रहम्। पञ्चदेवमयं वर्णं पञ्चप्राणात्मकं प्रिये। रजःसत्त्वतमोयुक्तं त्रिबिन्दुसहितं सदा। त्रिशक्तिसहितं वर्णमात्मादितत्त्वसंयुतम्" कामधेनुतन्त्रम्। अस्य वाचकशब्दा योगिनीतन्त्रोक्ता यथा "शः सव्यश्च कामरूपी कामरूपो महामतिः। सौख्यनामा कुमारोऽस्थि श्रीकण्ठो वृषकेतनः। वृषघ्नः शयनं शान्ता सुभगा विस्फुलिङ्गिनी। मृत्युर्देवो महालक्ष्मीर्महेन्द्रः कुलकौलिनी। बाहुर्हंसो वियद्वक्त्रं हृदनङ्गोऽङ्कुशः खनः। वामोरुः पुण्डरीकाक्षः कान्तिः कल्याणवाचकः"। मातृकान्यासेऽस्य हृदादिदक्षकरे न्यास्यता। काव्यादौ प्रथमप्रयोगे सुखं फलम्। "शः सुखं धस्तु खेदम्" वृ० र० टी०।

**श** न० शो–ड। १मङ्गले त्रिका०। २महादेवे, ३शस्त्रे च पु० [शब्दर०।

**शंयु** त्रि० शमस्त्यस्य शम्+युस्। शुभान्विते त्रिका०।

**शंव** त्रि० शमस्त्यस्य शम्+व। १शुभयुक्ते त्रिका०। २मूषलाग्रलौहे ३ वज्रे च पु० धरणिः।

**शंवर** न० शं वृणोति शम्+वृ–अच्। जले अमरः।

**शंसा** स्त्री शन्स–अ। १वाक्ये। २वाञ्छायां मेदि०। ३प्रशंसायाञ्च शब्दर०।

**शंसित** त्रि० शन्स–क्त। १निश्चिते हला०। २हिंसिते। ३कथिते ४स्तुते च।

**शंस्य** त्रि० शन्स–ण्यत्। १हिंस्ये २स्तुत्ये ३वाच्ये च।

**शक** त्रासे अक० संशये सक० भ्वा० आ० सेट् इदित्। शङ्कते अशङ्किष्ट।

**शक** क्षमायां सक० दि० उभ० सेट्। शक्यति ते अशाकीत्–अशकीत् अशकिष्ट "शक्योऽस्य मन्युर्भवता विनेतुम्" रघुः।

**शक** सामर्थ्ये स्वा० प० अक० इरित् वेट्। शक्नोति अशकत्–अशाक्षीत्। पुषादिरित्येके तेन अशकदित्येव।

**शक** पु० शक–अच्। १जातिभेदे स च व्रात्यक्षत्रियः १९०७पृ० दृश्यम्। २देशभेदे स्वराज्यावधिवत्सराङ्कप्रवर्त्तके ३नृपभेदे ४तदीये वत्सरे च। कलियुगे शककर्त्तृषु षट्सु युधिष्ठिरः विक्रमादित्यः शालिवाहनश्चेति त्रयोगताः